अथ रामरहस्यपत्राय वाक्यार्थ ~~६४५~~ ~~८६०~~




पे. ५०

ग्रं. सं. ~~८४०~~ २५३

फला॰
स्वात्यंस॰
न्येसम्यगुक्तेमया।
यथायति॥तथासमरु॰

अथ रामरहस्यत्रय वाक्यार्थ ~~६८५~~ ~~८५०~~



वे. ५०

त्वा...
न्यंसम्यग्...
यथायति॥तथा...

...य नमः ॥ श्रीरामः सर्वलोकानां नायकः करुणार्णवः ॥ ददातु स्वपदांभोजः सर्वविघ्नभय
॥ मुमुक्षूणां हितार्थाय स्वान्तःशान्त्यै तथैव च ॥ त्रिरहस्यवाक्यार्थं गुरून्नत्वा प्रवक्ष्महे ॥ २ ॥ श्री
...नाख्यं गुरुं चैव ऽनंतानंदं च तद्गुरुम् ॥ रामानन्दं महाचार्य्यं राघवार्य्यं ततः परम् ॥ ३ ॥ कुरेशं पतिराजं च
यामुनं शठकोपकम विष्वक्सेनं च सीतां च सीताकांतं परं गुरुम् ॥ ४ ॥ श्रीरामे प्रवृत्तिमिच्छतां जनानां
तत्प्रवृत्तेस्तन्मंत्रायत्तत्वात्तन्मंत्रप्रवृत्तौ ॥ मंत्रं वै भवज्ञानस्य कारणत्वाद्याद्यौ मंत्रं वै भवं श्रुतिस्मृतिभिः ।
प्रतिपाद्यते तथा हि ॥ तारकत्वात्तारको भवति तदेव तारकब्रह्म त्वं विद्धि तदेवोपास्यमिति ज्ञेयं गर्भजन्म
जरामरणसंसारमहद्भयात्तारयतीति तस्मादुच्यते तारकमिति ॥ १ ॥ य एतत्तारकं ब्राह्मणो नित्यमधीते ।
स पाप्मानं तरति स मृत्युं तरति स ब्रह्महत्यां तरति स भ्रूणहत्यां तरति स वीरहत्यां तरति स सर्वहत्यां तरति
स संसारं तरति सो विमुक्तात्माश्रितो भवति स महात्मा भवति सोमृतत्वं च गच्छति सोमृतत्वं च गच्छति ॥ २
तथा वाल्मीक्यसंहितायां ॥ सुतीक्ष्णा मंत्रवर्गेषु श्रेष्ठो वैष्णव उच्यते ॥ गाणपत्येषु शैवेषु शाक्तशौरेष्वभीष्टदः ॥

राम
१

१ ॥ वैष्णवेष्वपि सर्वेषु राममंत्रफलाधिकः । मंत्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः ॥ २ ॥ तथा च बृहद्ब्रह्म
संहितायां ॥ श्रीराममंत्रराजस्य माहात्म्यं गिरिजापतिः ॥ जानाति भगवाञ्छंभुर्ज्वलत्पावकलोचनः ॥ १
रामो ङे-ऽन्तो वह्निपूर्वो नमोन्तः स्यात्षडक्षरः ॥ तारको मंत्रराजो यं संसारविनिवर्तकः । २ । तथा च हा
रिते ॥ तस्य श्रवणमात्रेण सर्व एव दिवं गताः ॥ अनन्ता भगवन्मंत्रा नानेन तु समाः कृताः ॥ १ ॥ तथा
च सारदातिलके ॥ वेदानां च यथा सामवेदो ज्ञायते वरम् ॥ तथा समस्तमंत्राणां राममंत्रः प्रकी
र्तितः ॥ ४ ॥ क्षेत्राणां च यथा काशी सर्वशास्त्रेष्वनुत्तमाः ॥ तथा समस्तमंत्राणां राममंत्रः प्रकीर्तितः ॥ ५ ॥
फलानां च यथा चूतं विशेषपरिकीर्तितं ॥ तथा समस्तमंत्राणां राममंत्रः प्रकीर्तितं ॥ ६ ॥ वृक्षाणां च यथा
श्वत्थं सम्यक् प्राहुर्मनीषिणः ॥ तथा समस्तमंत्राणां राममंत्रः प्रकीर्तितः ॥ ७ ॥ शस्यानां च यथा धा
न्यं सम्यगुक्तं मनीषिभिः ॥ यथा समस्तमंत्रेषु राममंत्रः प्रदृश्यते ॥ ८ ॥ वर्णानां च यथा विप्र आश्रमाणां
यथा यतिः ॥ तथा समस्तमंत्राणां राममंत्रः प्रशस्यते ॥ ९ ॥ पशूनां च यथा गौस्तु वंद्या सर्वमनीषिभिः ॥ त

थासमस्तमंत्राणां राममंत्रः प्रकीर्तितः ॥ १० ॥ यथामनुष्येषु वरं राजेशः परकीर्तितः ॥ तथा समस्तमंत्रेषु राम
मंत्रः प्रभुर्मतः ॥ ११ ॥ पुष्करेष्वेषु च यथा तीर्थं तोयं प्रशस्यते ॥ तथा समस्तमंत्रेषु राममंत्रः प्रकीर्तितः ॥ १२ ॥ त
थाचास्कंधे ॥ विश्वरूपस्य तेराम विश्वेशब्दाहि वाचका ॥ तथापि मूलमंत्रस्ते विशेषांवीजमक्षयं ॥ १ ॥
त्वचिंत्योयं महाबाहो मंत्रश्चिंतामणिर्विभो ॥ विहायैनं विमूढात्मा ततश्चेतश्च धावति ॥ २ ॥ तथा पाद्मे
न्यासमंत्राक्षरं मंत्रे मन्यत्त्ववैष्णवं परं ॥ न्यासमेवात्र परमं वैष्णवानां शुभानने ॥ १ ॥ तस्मात्तु न्यासमेवैषा
मतिरिक्तमिहोच्यते ॥ न्यासविद्यापरो यस्तु ब्राह्मणः श्रेष्ठ उच्यते ॥ २ ॥ न्यासात्परतरं मंत्रं नास्ति सत्यं ब्रवीमि ते
तथा रुद्रयामले ॥ इत्येतद्रामचंद्रस्य मंत्रमष्टाक्षरं परम् ॥ जयत्सपरया भक्त्या यदि मे प्राणवल्लभः ॥ १
तथा च श्रीनारायणवचम् मंत्रश्चाष्टाक्षरो देवि श्रीरामः शरणं मम ॥ सिद्धोपायोक्षरविदां भावनाप
रिकल्पितः ॥ १ ॥ इत्युक्त ज्ञानवतां मुमुक्षूणां सदाचार्यकृपाकटाक्षेण प्रपन्नानां रहस्यानि त्रीणि श्रीमं
त्रराज ॥ श्रीरामाष्टाक्षरः सकृदेव प्रपन्नायेत्यादीनि ज्ञातव्यानीनि ॥ तत्र श्रीमत्षडक्षरमंत्रराजः ॥ षट्प

दात्मकः ॥ पंचपदात्मश्चेति ॥ तत्र प्रथमपदं रकारः ॥ अव्यक्तचतुर्थ्यात्मकः । द्वितीयपदं आकारं प्रथमान्तः
तृतीयपदं मकारप्रथमान्तः ॥ चतुर्थपदं रामायेति ॥ पंचमपदं नेत्यव्ययं ॥ मङ् इति षष्ठ्यंतं पदम् तत्र प्र
थमपदेन रकारेणाहेयप्रत्यनीककल्याणैकतानः ॥ सर्वजगत्कारणभूतः । सर्वरक्षकः । सर्वशेषी भगवा
न् सीतापतिः ॥ श्रीरामः प्रतिपाद्यते ॥ दिनतत्र हेयप्रत्यनीककल्याणैकतानत्वन्नाम ॥ हेयशब्दवाच्यान
हे स्वरूपत्वेन सर्वज्ञत्वाद्यनन्तकल्याणगुणाश्रयत्वम् ॥ तथा हि निष्कलं निष्क्रियं शांतं निरवद्यं निरं
जनमित्यादिभिर्ब्रह्मणो निर्गुणत्वं प्रतीयते यः सर्वज्ञः सर्ववित् ॥ परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी
ज्ञानबलक्रिया च ॥ एष सर्वेश्वर एष भूताधिपतिरेष भूतभूपाल ॥ एष सेतुर्विधरण इत्यादिभिस्सगुणा ।
त्वम् ॥ उभयविधवाक्यानां विरोधपरस्य ब्रह्मणः ॥ श्रीरामस्य हेयप्रत्यनीककल्याणैकतानत्वं श्रुत्या व्यव
स्थापयंति ॥ एष आत्मा ऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सो ऽपिपासः ॥ सत्यकामः सत्यसंक ।
ल्पः । तत्तदद्रेश्यमग्राह्यमगोत्रवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूत

तयोर्नित्यं परिपश्यन्ति धीरा इत्यादयस्स्मृतयश्च ॥ अजेन विश्वरूपेण निर्गुणेन गुणात्मना सगुणो निर्गुणो वि
ष्णुर्ज्ञानगम्योऽस्य सौस्मृतः ॥ न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि ॥ वक्तुं शक्या वियुक्तस्य सत्वाद्यैरखिलै
र्गुणैः ॥ एषः सर्वस्य विधृतिः हेतुश्चेत्याप्रकीर्तितः ॥ श्रीयते शततं रामः स हि विष्णुः सनातनः ॥ तेषामपिम
हातेजा रामः सत्यपराक्रमः ॥ इष्टः सर्वस्य लोकस्य शशांक इव निर्मलः ॥ मनुष्यदेहाभ्युदयं विहाय दिव्ये
न देहाभ्युदये ॥ न युक्तः सर्वज्ञः सर्वदृक् सर्वशक्ति ज्ञानबलर्द्धिमान् ॥ अन्यूनश्चाप्यवृद्धिश्च स्वाधीनो ।
नादिमावशी ॥ क्लमतन्द्रीभयक्रोधकामादिभिरसंयुतः ॥ निरवद्यः परः प्राप्तेः निरधिष्ठोऽक्षरक्रमः ॥
त्वामचिन्त्यं महद्भूतमक्षयं चाजरं तथा ॥ कस्याराणाभिजनसाधुः ॥ सच सर्वगुणोपेतः कौशल्यानंदवर्द्धनः
शक्तितेजबलैश्वर्यवीर्य्यतेजान्यशेषतः । भागवच्छब्दवाच्यानि विना हेयैर्गुणादिभिरित्यादयः ॥ १ । स
र्वजगत्कारणभूत ॥ इति श्रीरामस्यैव परमात्मनः । सर्वजगत्कारणत्वं श्रुतिषु सिद्धम् ॥ सदेव सोम्येदमग्र
आसीदेकमेवाद्वितीयं तदैक्षत बहुस्यां ततेजास्सृजत यतो वाइमानि भूतानि जेन जातानि जीवन्ति यत्प्रय

न्त्यभिशंतितद्धिजिज्ञासस्व तद्ब्रह्मेति ॥ श्रीरामतापिन्यां च ॥ सीतारामौतन्मयावत्र पूज्यौजातान्याभ्यां भु
वनानिद्विसप्त च स्थितान्येव ॥ एषसर्वेश्वरएषसर्वज्ञएषोन्तर्याम्येष योनिः ॥ सर्वस्य प्रभवाप्ययौहि भूता
नामिति ॥ चिन्मयस्याद्वितीयस्येति ॥ अत्र रामोनन्तरूपस्तेजसावन्हिनासमः ॥ यथैव वटबीजस्थः प्राकृ
तश्च महाद्रुमः ॥ तथैव रामबीजस्थं जगदेतच्चराचरम् ॥ मित्यादिषु ॥ स्मृतिष्वपि सर्ववेदाश्रयत्वाच्च
सर्वलोकस्य कारणात् ॥ ईश्वरप्रतिपाद्यत्वादखंडब्रह्मवाचकः ॥ बीजे यथा स्थितो वृक्षः ॥ शाखापल्ल
वसंयुतः ॥ तथैव सर्वे वेदा हि रकारे मुव्यवस्थिताः ॥ रकाराज्जायते ब्रह्मा रकाराज्जायते हरिः ॥ रकाराज्जाय
ते शंभू रकारात्सर्वशक्तयः ॥ आदावंते तथा मध्ये रकारेयु प्रतिष्ठितम् ॥ विश्वं चराचरं सर्वमवकाशेनग्नि
स्पशः ॥ यथा करखंडे रत्नानि गुप्तान्यज्ञैर्न दृश्यते ॥ तद्वन्मंत्राश्च वेदाश्च रकारे सुव्यवस्थिताः ॥ सर्वजग
त्कारणभूतः ॥२॥ इति पुलस्त्यसंहितायां ॥ रामात्सकाशाद्वभूतं जगत्तत्रैव च स्थितं ॥ स्थितिसं
यमकर्त्ता सौ जगतोस्य जगच्च सः रामादित्यत्रयस्यार्थेयं चम्यार्थः ॥ पीडयापीडितं सर्वं जगदस्य जगत्य

त्तेः॥मूलस्यैवोपचारात्तेनवृक्षःपुष्पफलोपगः॥मूलंस्वेषमनुष्याणांधर्म्मसरोमहाद्युतिः॥पुष्पंफलंचप
त्रंचशाखाश्चास्येतरेजनाः॥श्रीमद्रामायणे॥मनुष्याणामितिबहुवचनंस्वारस्यात्तत्वैषामुपलक्षणं
कर्त्तासर्वस्यजगतोभर्त्तासर्वस्यसर्वगः॥संहर्त्ताकार्यजातस्यश्रीरामःशरणंममेति॥श्रीमन्नारायणवचनं॥पु
नःरामायणे॥त्वयाराणामपिलोकानामादिकर्त्तास्वयंप्रभुः॥तथाचपाद्मे॥त्वंविष्णुस्त्वंपरंब्रह्मयोगिध्ये
यःसनातनः त्वमेवसर्वदेवानामनादिनिधनोऽव्ययः॥ त्वंहिनारायणःश्रीमानसीतालक्ष्मीसनातनी॥पु
नःपाद्मेपरशुरामवचनं॥जानाम्यहंदेवककुत्स्थनाथवीर्यगुणादिभिः॥त्वमादिःपुरुषःसाक्षात्परंब्र
ह्मपरोव्ययः॥त्वमनन्तोमहाविष्णुर्वामदेवःपरात्परः॥नारायणस्त्वमीश्वरस्त्वंत्रयीमयः॥त्वंकालस्त्वंज
गत्सर्वमकारोयस्त्वमेवहि॥स्रष्टाधाताचसंहर्त्तात्वमेवपरमेश्वरः॥तथाचश्रीमद्रामायणे॥त्वंहि
नारायणःश्रीमानत्वपिसर्वंप्रतिष्ठितं॥त्वंप्रभुःसर्वभूतानांपुरुषस्त्वंसनातनः॥अत्रयुष्मच्छब्दावृत्त्याविं
ष्णुपरब्रह्मनारायणादिशब्दाभिधेयवस्तुनोश्रीरामत्वंप्रतिपाद्यते॥अहोनिश्चेतनोराजाजीवलोकस्यस

रूपं ॥ धर्म्मे सत्यव्रते रामे वनवासे प्रवत्स्यतीति वचनाच्च नारायणशब्दाभिधेयवस्तुनो श्रीरामत्वं स्पष्टम्
परं ब्रह्म परं ज्ञानं परं तत्त्वं परं तपः ॥ परं बीजं परं क्षेत्रं परं कारणकारणं ॥ अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा
ब्रह्मादिषु प्रलीनेषु नष्टे स्थावरजंगमे ॥ एकस्तिष्ठति विश्वात्मा स तु नारायणोऽव्ययः ॥ इति भारते ॥ पुनः रामाय
णे संक्षिप्य हि पुरा लोकान् मायया स्वयमेव हि ॥ महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ॥ विष्णुपुराणे च ॥ वि
ष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितं ॥ स्थितिसंयमकर्त्तासौ जगतोऽस्य जगच्च सः ॥ वाराहे च मम यत्र सकलं जातं
मयि सर्वं प्रतिष्ठितं ॥ मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ तथा च पाद्मे ॥ बहुनात्र किमिहोक्तेन यद्यदस्ति
विभाति च ॥ यच्चान्यत्सुखतरं लोके सर्वं रामे प्रतिष्ठितम् ॥ तथा च स्कान्दे ॥ देवाश्च सिद्धाश्च ऋषयश्च सर्वे वेदान्ततत्त्वा
र्थविदो यतीन्द्राः ॥ भक्त्यैव रामे स्पृहयन्ति यस्मिन् नत्वमेव ॥ तद्ब्रह्मपदं स्थितो यः ॥ यदेकमात्मानमनेकधैव विभ
ज्य विश्वं व्यतनोरमूर्त्तिः ॥ तथैव भानोरिव रश्मयो मीत्वन्तो वयं राम विनिःसृता हि ॥ तथा च पाद्मे ॥ एकस्त्वं पुरु
षः साक्षात्प्रकृतेः पर ईयसे ॥ यः स्वांशकलया विश्वं सृजत्यवति हंति च ॥ अरूपस्त्वमशेषस्य जगतः कारणं परं
एक एव त्रिधा रूपं गृह्णासि कुहकान्वितः ॥ ३ ॥ सृष्टौ विधात्रीरूपस्त्वं पालने स्वयमासि च प्रलये जगतः साक्षादहं

राम॥
॥ ५॥

सर्वास्वतो गतः॥ ४॥ रामान्नास्ति परो देवो रामान्नास्ति परं व्रतं। नहि रामात्परो योगो नहि रामात्परो मखः॥ ५॥ न
जानन्ति रघोर्नाथं सर्वे देवाधिदेवतं॥ लीलया विश्वस्रष्टारं हन्तारं मपि पालकमित्यादयः। ननु वेदान्तवाक्ये
षु। सद्ब्रह्माकाशादिशब्दाभिधेयस्यैव जगत्कारणत्वं श्रूयते कथं रामस्य जगत्कारणत्वमिति चेत्॥ उच्यते
यथा घटश्च कलशः पदार्थस्याभिधायकः॥ तथा ब्रह्मरामश्च नूनमेकार्थतत्परः॥ इत्यगस्त्यसंहितावच
नात्॥ ब्रह्मरामशब्दयोरेकार्थपरत्वात्॥ वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि॥ तस्मिन्नेव ब्रह्मशब्दो
मुख्यवृत्तो महामुने॥ यस्मिन्प्रयुज्यमाने तु गुणयोगस्तु पुष्कलः॥ तत्रैव मुख्यवृत्तोयमन्यत्र त्वुपचारतः इति
ब्रह्मशब्दस्य शार्ङ्गिणि पर्यवसानाच्च तत्तत्प्रकरणेषु सद्ब्रह्मादिशब्दवाच्यस्य श्रीरामस्यैव जगत्कारणत्व
मिति सदाकाशशब्दवाच्यत्वं श्रीरामस्यैव श्रीमद्रामायणे महर्षिणा प्रतिपादितं॥ रामः सत्पुरुषो लोके स
च्छब्दाभिधेयः पुरुष इत्यर्थः॥ अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः॥ आकाशप्रभवो ब्रह्मा शाश्व
तो नित्य अव्यय इति॥ अहं ते हृदयं राम जिह्वा देवी सरस्वती॥ मोत्वं पूर्वमजो जन इत्युपक्रमोपसंहारपर्या राम
लोचनया रामस्यैव हिरण्यगर्भपितृत्वं वेदे हृदयशब्दस्य पुत्रपर्यायत्वामिति। च। सर्वरक्षक इति। सर्वस्यभूत

जातस्य रक्षकः। सर्वरक्षकः श्रीरामस्य सर्वरक्षकत्वं श्रीमद्रामायणे स्फुटं। रक्षिता जीवलोकस्य धर्मस्य प
रिरक्षिता॥ रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता॥ स त्वं दंडधरो राजन् जितक्रोधो जितेंद्रियः रक्षितव्या
स्त्वया शश्वद्गर्भभूतास्तपोधनाः॥ ते वयं भवता रक्ष्या भवद्विषयवासिनः। नगरस्थो वनस्थो वा त्वं नो राजा जने
श्वर इति महर्षिवचनं॥ नगरस्थ इति त्रिपाद्विभूतिस्थः वनस्थः॥ लीलाविभूतिस्थः इत्यर्थः॥ तथा श्रीरा
मवाक्यं॥ तपस्विनां वने शत्रून् हन्तुमिच्छामि राक्षसान्॥ अधिरोहार्य पादाभ्यां पादुके हेमभूषिते। एते हि
सर्वलोकस्य योगक्षेमं करिष्यतः। पादुके। यस्य लोकानां योगक्षेमप्रभूतस॥ अहो स्वित्कोशलेन्द्रस्तु मुक्तिप
र्यन्त पालकः॥ तथा च पाद्मे॥ माता सा सर्वलोकानां पिता त्वं पुरुषर्षभः॥ नित्यं चैषा जगन्माता तव नित्या
नपायिनी यथा सर्वगतस्त्वं हि तथा चैयं रघूत्तमः॥ इत्यादयः। सर्वशेषीति श्रीरामस्यैव सर्वशेषित्वं॥ श्रुति
सुसिद्धं॥ उ। एष भूतपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय॥ पतिं विश्वस्यात्मेश्वरंस्तु
त्तिं चक्रुश्च जगतः पतिं कल्पतरौ स्थितं॥ कामरूपाय रामाय नमो मायामयाय च इत्यादिषु॥ प्रजापतिपतिं वि
म्भुमनंतमपराजितं॥ प्रधानपुंसोरजयोः। कारणकार्यभूतयोः॥ लीलाजगत्पतेस्तस्य छंदतः संप्रवर्तते

॥राम॥ ॥६॥

पीडयापीडितं सर्वं जगत्पत्ते:॥अनुरूप: सर्वोनाथो लक्ष्मीवान् लक्ष्मणाग्रजः। त्रैलोक्यमपि नाथेन येन स्यान्नाथव
त्तरं। सोयं संन्यस्तभारो हित्वामुपास्य जगत्पतिम्॥रक्षांविधत्स्व भूतेषु ममत्ते जस्करो भवान्। तथाच पाद्मे। एष रामः
परं ब्रह्म कार्यकारतः परं॥चराचरजगत्स्वामी नमाम्य एव पूर्द्धुरः॥ इत्यादिषु स्मृतिषु च अत्र पतिशब्दस्य शेषिप
रत्वं श्रीभाष्यादिषु निर्णीतम्। ३। भगवानिति। शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते। मैत्रेय भगवच्छब्द:
सर्वकारणकारणे इत्याद्युक्तप्रमाणो भगवच्छब्दः। श्रीरामे रूढः। तदुक्तं मधुरस्वामिना समुदायोहि तत्वानां
कारणं जगज्जने:॥भगशब्देन संदिष्टस्तद्वान्स भवानिति॥भाग्यवद्व्यधिः॥श्रीमान्रामो विष्णुः सनातन। इ
तिसीतापतिशब्देन सर्वदेशसर्वकालसर्वावस्थासु॥ दंपत्योर्विश्लेषाभावः सूचितः महर्षिणापि।अनन्याहि
मयासीता भास्करेण प्रभा यथा॥अनन्याराघवेणाहं भास्करेण प्रभायथा॥इत्यादिषु तदुक्तं चाचार्यपादै:।ज
पत्याश्रितसंत्रासध्वांतविध्वंसनोदयः॥प्रभावान्सीतया देव्या परमव्योमभास्कर इतिरामपदेनोक्तवस्तुमा
राजात: सूचितः॥अनेन रकारवाच्योक्तगुणाविशिष्ट॥श्री भगवान्सीतापतिः श्रीरामप्रतिपाद्यते॥अनेन राम
रक्षकांतरप्रतिपत्तिव्यावर्त्यते स्म॥श्रीरामस्य रक्षकत्वाद्रक्षकांतरप्रतिपदेरनुपपत्तिरित्यर्थः॥ननहेय प्र

त्वंरकारस्य कथमितिचेत्‌॥ उच्यते॥ लोककल्याणैकतानत्वादिगुणविशिष्टस्य श्रीरामस्य परमात्मनो वाचकत्वं रकारस्य कथमितिचेत्‌॥ उच्यते॥ अवाप्तसमस्तकामतयाहेयप्रत्यनीककल्याणैकताने॥ अस्थूलमनन्त्वादिविशेषिते। सच्चिदानंदरूपस्वात्मनि रमते इति रः॥ बाहुलकादधिकरणेडुः डित्वादिलोप। रादानेइति धातोराति गृह्णातिकुक्षौ। विश्वमितिरः। राद्दीप्ताविति धातोः राति प्राकाशते इतिरः॥ इत्यनेन जगज्जन्मादिकर्तृत्वेन रकारस्य सर्वेश्वरत्वं। जगत्कारणत्वंच सिद्धं। चराचरभूतेषु अंतरात्मस्वरूपेण रमते इतिरः। रमतइति व्युत्पत्या विश्वग्नहणात्‌ स्वारस्याच्च कारस्य सर्वशेषित्वंच सिद्धं। अत्र वक्तव्यानि निर्वचनान्युपरिष्टात्‌ वक्ष्यंते॥ तथाहि स्वगतातिशयाधानेछयोपादातत्वं शेषिणस्वमाणस्य चिदचिद्वस्तुनस्तच्छेषत्वं तथाहि परगतातिशयाधानेछयोपादेयत्वं शेषत्वं शेषः। परार्थत्वादितिन्यायात्‌॥ भगवतश्चेतनसंरक्षणादशायां पुरुषकारसन्निधेरपेक्षितत्वात्‌॥ अविनाभावाच्च रकारे॥ जानकीशंबंधोप्यनुसंधेयः॥ अनन्याहिमयासीताभास्करेणप्रभायथा॥ इतिरामोक्त्या॥ अनन्याराघवस्याहं भास्करेणप्रभायथा॥ इतिजानक्युक्त्याच॥ जानकीरामयोर्विश्लेषरहित्यंसूचितं। द्वितीयपदेनेति॥ निपातानामनेकार्थत्वादकारस्यैवकारार्थत्वंशेषस्पष्टं ज्ञाद्धि

तीयपदेनाकारेणाऽन्यशेषत्वनिर्वृत्तिर्भगवदनन्यार्हशेषत्वंदेवतान्तरादिशेषत्वव्यावृत्तिश्चप्रतिपाद्यते
तृतीयपदेनमकारेणज्ञानानंदस्वरूपोज्ञानानंदगुणकोऽणुपरिमाणोदेहादिविलक्षणः॥स्वयंप्रका
शोनित्यस्वरूपोजीवःप्रतिपाद्यते॥४॥ज्ञानानंदस्वरूपइति॥जीवानांज्ञानानंदस्वरूपत्वंतद्गुणकत्वंचश्रुति
स्मृतिषुसिद्धं॥अविनाशीऽयमात्मा॥अनुच्छित्तिधर्मा॥नविज्ञातुर्विज्ञातेर्विपरिलोपोविद्यते॥तदेवचित्स्वभा
वस्यपुंसःस्वाभाविकीवित्ति॥ततस्तत्पदार्थसंसर्गात्तत्तद्वित्तित्वमश्नुते इत्यादिषुज्ञानस्वरूपमेवानुकूला
नन्दस्वरूपत्व॥अणुपरिमाणत्वंच॥एषोऽणुरात्माचेतसावेदितव्यः॥आराग्रमात्रोह्यवरोऽपिदृष्टः॥बाला
ग्रशतभागस्यशतधाकल्पितस्यच॥भागोजीवःसविज्ञेयःसचानंत्यायकल्प्यते इत्यादिषुप्रसिद्धं॥देहादिवि
लक्षणत्वंच॥यआत्माऽपहतपाप्माविजरोविमृत्युर्विशोकोऽविजिघत्सोऽपिपासःसत्यकामःसत्यसंक
ल्पः॥मघवन्मर्त्यंवाइदंशरीरस्यात्मनोऽधिष्ठानं॥अथयत्रैतदाकाशमनुविषण्णंचक्षुःसचाक्षुषः॥पुरु
षोदर्शनायचक्षुः॥अथयोवेदेदमभिव्याहराणीतिसआत्माऽभिव्याहारायवाक्॥अथयोवेदेदंमन्वानी
तिस॥आत्मामनोऽस्यदैवंचक्षुः॥सवाएषएतेनदैवेनचक्षुषामनसैतान्कामान्पश्यन्रमतेयएतेब्रह्मलोकेइ

त्यादिषु सिद्धं ॥ देहेंद्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः । नित्यो व्यापी प्रतिक्षेत्रं आत्मा भिन्नः स्वतः सुखीत्या
दिष्वपि ॥ अनन्यसाधनत्वं । स्वयंप्रकाशत्वं ॥ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां विदधाति कामा
नित्यादिषु च ॥ यस्यात्मा शरीरं ज्ञानमयोऽमल इति ॥ मकारस्य जीववाचकत्वं श्रुतिस्मृतिषु प्रसिद्धं । मकारस्य
पंचविंशाक्षरत्वात् पंचविंशो पुरुषः ॥ पंचविंशात्मा भवति । भूतानि च कवर्गेण चवर्गेण इंद्रियाणि चट
वर्गेण तवर्गेण ॥ ज्ञानगंधादयस्तथा मनः ॥ पकारेणोक्तं । फकारेण त्वहंकृतिः ॥ बकारेण भकारेण महा
न्प्रकृतिरुच्यते । आत्मा तु समकारेण पंचविंशः प्रकीर्तितः इत्यादिषु ॥ भारते च । अन्यस्वराजन्नस्य परमस्त
थान्यः पंचविंशकः ॥ तस्थत्वादनुपश्यन्ति ह्येक एवेति साधवः ॥ अबुद्धमानां प्रकृतिं बुध्यते पंचविंशकः
तनु बुध्यति गंधर्व प्रकृतिः विंशकमित्यादौ । यस्यात्मा शरीरमित्यनेन भगवच्छेषभूतानां जीवानां तत्पारतं
त्र्यं च शरीरस्यात्माऽऽपत्त्याधारवत्वात् ॥ तथा चोक्तं पूर्वाचार्यैः । आत्मनो नित्यत्वाणुत्वस्वयंप्रकाशत्वज्ञा
तृत्वभोक्तृत्वपरमात्मशेषत्वतत्पारतंत्र्यत्वानंदगुणकत्वज्ञानानंदस्वरूपत्वलक्षणमात्मत्वमात्वसद्भाव
तिनिमित्तमिति ॥ तस्मान्मकारवाच्या नित्यमुक्तमुमुक्षुकेवलबद्धाः । पंचविधा जीवाः । रकारवाच्यायैव भगव

त्वस्वरूपानुं भवानंद भोग्यत्व भगवत्प्राप्यत्वमेवोचितमित्याह भगवान्पराशरः॥ दासभूताः स्वतः सर्वे ह्यात्मानः।
परमात्मनः नान्यथा लक्षणं तेषां बंधे मोक्षे तथैव च॥ हारीतो प्याह॥ दास्यमेव परम धर्म्मं दास्यमेव परं हितं
दास्येनैव भवेन्मुक्तिरन्यथा निरयं व्रजेत॥१॥ नारायणस्य दासा ये न भवंति नराधमाः॥ तेषामेव हि संसृत्वं नि
रयं व्रह्मणानघ॥२॥ विष्णोर्दास्यं परा भक्तिर्येषां तु न भवेत्तव चित्त॥ जीवंतः शव चांडाल भविष्यंति न संशयः॥३
तस्माद्दास्यं परा भक्ति मालंव्य नृप सत्तम॥ नित्य नैमित्तिकं सर्वं कुर्यात्प्रीत्यै हरेः सदा॥४॥ विष्णोरनचरत्वंहि
मोक्षमाहुर्मनीषिणः॥ न दास्यं वै परेशस्य वंधनं परिकीर्तितमिति॥ पाद्मेपि विहरत्वं सुखं राम जानकी सहि
तो नघ॥ अहं सेवां करिष्यामि जाग्रतः स्वपतश्च ते॥ इति रकार मकार योर्मध्ये अकारस्तेन जीव व्रह्मणोर्नवvि
ध संवंधोपि दर्शितः। शेष शेषि भावः। पिता पुत्र भावः॥ भार्य्या स्वामि भावः नियाम्य नियामक भावः आधारा
धेय भावः। स्वस्वामि भावः। शरीर शरीरि भावः। धर्म्म धर्म्मि भावः। रक्ष्य रक्षक भाव इति। श्री रामेति। रमयति॥
स गुरोः॥ कारु णयादिभिमकार वाच्यो हंकार वाच्या येवशेष भूतइ ति वाक्यार्थः॥ चतुर्थ्यं पदेनरामायेत्यनेनस
र्वचेतनाचेतनरमपितृत्वं श्रीरमपितृत्व मुभयलिंगत्वं सर्वं व्याप्यत्वं सर्व प्रापकत्वं सर्वविधवंधुत्वं। नु भय

विभूरस्वस्मिन्सर्वोनित्तिरामः यद्यपि ॥ अकर्त्तरिचकारके संज्ञामितिकर्त्तर्य्यतिरिक्ते कारके घञ् स्मर्य्यतेतत्
थापि ॥ रामो रमयत्तांवरइति महर्ष्युक्तनिर्वचनात्त ॥ कर्त्तर्य्यपिकारके घञ् ॥ तथाच सर्वकल्याणगुणाश्रयत्व
हेतुकस्वस्मिन्सर्वचेतनरमपितृत्वंरामपदप्रवृत्तिनिमित्तिभावः । श्रीरमपितृत्वमिति श्रियं रमयतीतिरामः
श्रीयः कमलवासिन्याः रमणोयंमहाविभुः ॥ तस्माछ्रीरामइत्यस्यनामसिद्धंपुरातनमित्तिपाद्मे ॥ तथाच
हारीतेः ॥ श्रियोरमणासामर्थ्यात्सौंदर्य्यगुणसागरादित्यादिषु । श्रीरामस्य श्रीरमपितृत्वंसिद्धं । उभयलिङ्ग
त्वमिति ॥ अवाप्तसमस्तकामत्तयाहेयः प्रत्यनीककल्याणैकतानेअनन्तेसच्चिदानन्दे ॥ स्वस्वरूपे रमतेइ
तिरामः ॥ अस्यनिर्वचनंश्रीमद्भगवत्तनुक्तम् ॥ श्रीरामत्तापिन्यांच ॥ मर्त्त्यावतारस्त्विह मर्त्यशिक्षणंरक्षोवधा
यवनकेवलंविभोः । कुतोन्यथास्याद्रमतः ॥ स्वआत्मनः । सीताकृत्तानिव्यसनानीश्वरस्य । रमन्तेयोगिनोन
न्तेसत्यानन्दे चिदात्मनि ॥ इतिरामपदेनासौ परब्रह्माभिधीयते ॥ इत्यादिकं सर्वमाप्यत्वमिति ॥ श्रीरामस्येवय
रमात्मनः सर्वप्रापकत्वंश्रुतिस्मृतिषुश्रूयते । तथाहियथायादाद्रस्त्वचाविनिर्मुच्यते ॥ एवंहैवसपाप्मा
नाविनिर्मुक्तः । ससामभिरुन्नीयतेब्रह्मलोकं सएतस्माज्जीवघनात्परात्परं पुरीशयंपुरुषमीक्षते । सए

॥राम॥
॥९॥

षः संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपं । संपद्य स्वेन रूपेणाभिनिष्पद्यत इति ॥ पुरि परमायो ध्यायां
शेते इति पुरिशयः तं पुरिशयं ॥ अत्र संप्रम्या अलुक् तत्र प्रमाणम् ॥ देवानां पूरयोध्या तस्यां हिरण्मयः ॥
कोशः स्वर्गो लोको ज्योतिषावृतः ॥ त्वं हि नानारायणः ॥ श्रीमानत्वपि सर्वं प्रतिष्ठितम् । त्वं प्रभुः सर्वभूता
नां पुरुषस्त्वं सनातनः ॥ रामः सत्पुरुषो लोके सत्यधर्मपरायणः इति सत्तां प्राप्यः पुरुष इत्यर्थः ॥ परं ब्रह्म
परं धाम मे परं बीजं परंतपः ॥ अचिन्त्यतिनायकात्वं सत्यानंद चिद्रूपत्वं प्रतिपाद्यते ॥ अनेन रागद्वेषादिकर
णाम बन्धुभूतेषु बंधुत्व प्रतिपत्तिश्च व्यावर्त्यते ॥ ६ ॥ मव्यक्तमनन्तमूर्त्तिज्योतिर्मयं राममसत्रं भजामोति वृ
क्ष इव स्तब्धो तिविविति घृत्स्येकः निवासवृक्षः । साधूनां प्रपन्नानां परागतिः ॥ साधूनामुपासकानामित्यर्थः नि
त्यमतजनैः पृष्ठो निवृष्टः परमेपदे ॥ परं परम भक्तानां श्रीरामः वासुदेवादिमूर्त्तीनां चतुर्णां कारणं परं चतु
र्विंशतिमूर्त्तीनामाश्रयो शरणामम ॥ इत्यादिषु इत्यनेन श्रीरामस्यैव परव्यूहविभवान्तर्यामित्वम् परम
प्राप्यरूपस्य हि भजनत्वं च तत्र परमपुरुषस्य हि भजनत्वे श्रुतिस्मृतिप्रमाणान्यनुसंधेयानि तथा हि मुखं किम
स्यासीत् किं बाहू किमूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । तस्माद्धा एतस्मात्त विज्ञा

न मयादन्योन्तर आत्मा आनंदमयः तेनैषः पूर्णः स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधः।
तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः। आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठा। भूरिति शिर एके
हि शिरः। एकमेतदक्षरं। भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे सुव इति प्रतिष्ठा॥ द्विभुजः कुंडली रत्नमाली वीरो
धनुर्धरः। हेमाभया द्विभुजया सर्वालंकारयाचिता। श्लिष्टः कमलधारिण्या पुष्टः कोशलजात्मजः इत्यादी
नि ध्येयः॥ सदा सवितृमंडलमध्यवर्ती नारायणः। सरसिजासनसन्निविष्टः केयूरवान मकरकुंडलवान
किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः। सूर्यमंडलमध्यस्थं रामं सीतासमन्वितं॥ नमामि पुंडरीका
क्षं रमेयं गुरुं तत्परम्॥ प्रारंभे कर्मणां प्रातः पुंडरीकं स्मरेद्धरिं॥ शंखचक्रधरं देवं द्विभुजं पीतवाससम् स्थू
ले चाष्टभुजं प्रोक्तं सूक्ष्मे चतुर्भुजं तथा॥ परंतु द्विभुजं रूपं तस्मादेतत् त्रयं यजेदित्यादीनि स्म. तिवाक्यान्यपि आ
दित्यान्तर्यामी नो भागवतो द्विभुजस्य नमसः॥ पारत्वश्रुतिरेव दर्शयति॥ य एषोऽन्तरादित्ये हिरण्मयः। पुरु
षो दृश्यते। हिरण्मयश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः। तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी।
आदित्यवर्णं तमसस्तु पारे इति॥ कश्चिन्त न ह्रेम समान वर्णो पद्मानन्नं पद्म समान गंधिमयाविनाश्य

॥राम॥ त्तिशोकदीनंजलस्ययेप्यमिवात्तयेनसूर्य्यस्यापिभवेत्सूर्य्योह्यग्नेरग्निःप्रभोःप्रभुरित्याद्युपबृंहणावला
॥१०॥ त्श्रीरामस्यैवसूर्य्यान्तर्यामित्वं।पुनश्चसीताकांतस्यैवपरमव्योमभास्करत्वमुक्तंवरदाचार्य्यैः॥जपत्या
श्रितसंत्रासध्वांतविध्वंसनोदयः।प्रभावान्सीतयादेव्यापरमव्योमभास्करइति॥असंगेनप्राप्यस्यहि
भुजत्वंप्रतिपाद्यप्रकृतिमनसरामः।रमन्तेयोगिनोनन्तेसत्यानन्देचिदात्मनि।इतिरामपदेनासौपरंब्रह्मा
भिधीयते इत्यनेनयोगिरमणाधिकरणत्वात्प्राप्यत्वं।योगिनोमुक्ताःसर्वव्यापकत्वमिति श्रीरामस्यैव
परमात्मनःसर्वप्रापकत्वम्।नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेनयमेवैषवृणुतेतेनलभ्य
स्तस्यैषआत्माविवृणुतेतनुंस्वामिति एषसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषति एषएवासाधु
कर्म्मकारयतितं।यमेभ्योलोकेभ्योऽधोनिनीषतीत्यादिषुश्रुतिषुश्रूयते॥बंधकोभवपाशेनभवपाशाच्चमो
चकः॥कैवल्यदःपरंब्रह्मविष्णुरेवसनातनः॥तेषामहंसमुद्धर्ताम्मृत्युसंसारसागरात्।भवामिनचिरात्पार्थम
य्यावेशितचेतसां।ततस्तंम्रियमाणंतुकाष्ठपाषाणसन्निभं॥अहंस्मरामिमद्भक्तंनयामिपरमांगतिं।भरणोहिभ राम
वान्शक्तः।फलानांमहतामपि।त्वंहितारयितुंशक्तःसेंद्रानपिदिवौकसःइत्यादिषु॥सर्वविधवंधुत्वमिति

त्वमेवमाता च पिता त्वमेव त्वमेव बंधुश्च सखा त्वमेव। त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव। अहं
तावन्महाराजे पितृत्वं नोपलक्षये॥ भ्राता भर्ता च बंधुश्च पिता माता च राघवः। माता रामो मत्पिता रामचंद्रः स्वामी
रामो मत्सखा राघवेशः। सर्वस्वं मे रामचंद्रो दयालुर्नान्यं जाने नैव जाने न जाने मातापितायुवत्तयस्तनया वि
भूतिरित्यादिकं॥ श्रीरामस्य सर्वविधबंधुत्वेमानं द्रष्टव्यम्। उभयविभूतिनायकत्वमिति अन्तरात्मस्वरूपे
णा सर्वेषु स्थावरेषु च॥ अंतरात्मस्वरूपेणात्तेन रामेति भन्यते। इति निर्वचनात्॥ अन्तः प्रविष्टः शास्ता जनानां।
अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीत्यादिभिरेकार्थ्यात्। सर्वनियंतृत्वमेवोभयविभूति
नायकत्वं तदुक्तं श्रीमद्यामुनाचार्य्यैः। यद्ब्रह्मांडमराउन्तरगोचरं च यत्तद्दशोत्तराणयावरणानियानि च। गुणाः
प्रधानंपुरुषः परंपदं परात्परंब्रह्म च ते विभूतय॥ इति श्रीरामस्योभयविभूतिनायकत्वं सर्वान्तरात्मत्वं च वा
ल्मीकि महर्षिभिरुक्तम्। जगत्सर्वं शरीरं ते नैनतदस्ति त्वया विना॥ अनुरूपः स वै नाथो लक्ष्मीवान्लक्ष्मणाग्र
जः त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरमित्यादिभि। त्रैलोक्यमिति लोकस्तु भुवने ज॥ चतुर्थ्या स्वरूपानु
रूपकैंकर्य्यप्रार्थनोच्यते॥ अनेन प्राप्तविषयानरसेवाव्यावर्त्यते। पंचमपदेनन त्यनेन भगवदन्यप्रयोजन

॥राम॥ त्वं स्वस्वातंत्र्यं च व्यावर्त्यते तेन । उ इति कोशात् तल्लोकशब्दो जनपरः ॥ त्रयो लोका स्त्रिलोकास्त एव त्रैलोक्यं । त्रयो नित्यमुक्त
॥११॥ बद्धाः । येन श्रीरामेण नाथवन्तः स्युरित्यर्थः सत्यानंदचिद्रूपत्वमिति ॥ सत्यानंदचिदात्मनि चिन्मयानंदविग्रहे । सत्यंज्ञा
नमनंतं ब्रह्म आनंदो ब्रह्मेति चिन्मयः । परमेश्वरइत्युक्तरीत्या श्रीरामस्य सत्यानंदचिद्रूपत्वं सिद्धं । अनेनोक्तगुणविशि
ष्टत्वप्रतिपादनेन रागद्वेषादिकरणं व्यावृत्तमिति कथमिति चेदित्थम् सर्वान्तर्यामिनः । श्रीरामस्य प्रकारितया सर्व
स्य चिदचिद्वस्तुनः ॥ प्रकारतया प्रकारे पृथक्कृतानां रागद्वेषादिप्रकारिणो पर्यवसानात् । अतो मुमुक्षुभिः रागद्वेषव्य
तिरिक्ततया सर्वं भगवदात्म । षष्ठपदेन मइत्यनेन जीववाचकेन जीवस्य भगवदनन्यार्हशेषत्वं तत्त्वैकं कैंर्य्यैकप्रयोकत्वे
नानुसंधेयमिति भावः सर्वस्य ब्रह्मात्मकत्वेन वस्तुतया ऽन्यथात्वेनावस्तुतया ऽन्यथात्वेनावस्तुतया च । अतो ऽब्र
ह्मात्मके पृथक्त्वं नानुसंधेयमित्यर्थः ॥ ६ । चतुर्थ्यं जनत्वं तत्पारतंत्र्यस्वरूपं च प्रतिपाद्यते । तत्र वाक्यार्थः मका
रवाच्यो जीवो रामाय न स्वस्मै नमः शेषभूतो हमित्यर्थ इति अरवराडनमश्शब्द उपायवाचकः ॥ तिरावंगुणविशि
ष्टरामपदोपरिवर्तमानया चतुर्थ्या स्वरूपानुकैंकर्यप्रार्थना च्यते ॥ स्वरूपस्य भगवच्छेषतया भगवत्कैंकर्य्य
मेव तस्य स्वरूपानुरूपो धर्मः ॥ शेषस्येतन स्वस्मै नान्यस्मै इति । अन्यशब्दो भगवद्भागवताचार्यव्यतिरि

कपरः कुतो भागवत्तशेषत्वमन्तरेण भगवच्छेषत्वासिद्धेः। तथा च श्रुतिः। आचार्य्यवान्पुरुषो वेदेति स्मृ
तिश्च। आचार्य्यं मां विजानीयात्। रघुगरोत्तनपक्षानयाति न चेज्ज्ययानिर्वपनाद्भुहाहा। नच्छन्दसानैव
जलाग्निसूर्य्यैर्विना महत्यादरजोभिषेकात्। पञ्चमेनत्थोपक्षीवायेचवैवस्मसंश्रयाः। तेनैव तत्प्रयासंति
तद्विक्ष्मोः। तत्र मकारवाच्यस्य ममरकारवाच्यः श्रीरामशरणोपाय इति यावत्। रामिति बीजेनानन्याहशे
षत्वं रामायेत्यनेनानन्यभोग्यत्वं नमः। पदेनानन्योपायत्वमिति तत्तात्पर्यार्थः परमं पदं॥ त्र्यर्चेयित्वानु
गोविंदं तद्दीयानन्नार्चयन्ति ये नतु विष्णुप्रसादस्य भाजनं दांभिकाश्च ते। इति लोकसमाकुष्टः पादेष्वथ
प्रसादयन् रामेतत्स्ययति श्यामिसीतायालक्ष्मणस्य चेत्यादिषु श्रीरामेति स्वयं हरिं श्रयत इति श्रीःकर्त्त
रिव्युत्पत्तिः॥ क्विप्प्रत्ययान्तो निष्पन्नः॥ श्रीशब्दः श्रीयते जनैर्याऽसौ श्रीरिति कर्मणिव्युत्पत्तिः जीववि
ज्ञापन॥ श्रावयतीति रायन्त्यात्कर्तरि क्विप् जीवविज्ञापनं शृणोतीति श्रुधातोः। श्रोरणादिक श्रीशब्दो नि
ष्पन्नः जीवदोषान् शृणाति द्वितीयरहस्यं॥ श्रीराम इत्याद्याक्षरात्मकं पदत्रयं। तत्र प्रथमपदं श्रीराम इति
द्वितीयपदं शरणमिति ममेति तृतीयपदं तत्र श्रीशब्देन समस्तसमाश्रयणीया परमात्माश्रित निखि

॥राम॥ लजीवदोषनिहंत्री ॥ श्रीरामेभगवतिचेतनाचेतनविज्ञापनेश्रावयंती स्वगुणैरखिलंविश्वंपूर्यंतिभ
॥१२॥ गवतीसीतोच्यतेत्ति हिनस्तीति। शॄ हिंसायामितिधातोर्निष्पन्नः श्रीशब्दः। जीवगुणान्श्रावयति
विस्तारयतिइतिश्रीः श्रिञ् विस्तारे इतिधातोर्निष्पन्नः ॥ श्रीशब्दः रामायवात्सल्यस्वामित्वसौशील्यसौ
लभ्यसर्वज्ञत्वसर्वशक्तित्वाऽवाप्तसमस्तकामत्वसर्वजगत्कारणत्वपरमोदारत्वभवबंधविमोच
कत्वकृपादयाकरुणागुणवत्वसकलफलप्रदत्वपरमानंदत्वाद्यनंतदिव्यकल्याणगुणगणैःस्वा
श्रितान्जनान्रमयतीतिरामः रामेतिलोकरमणात् ॥ इतिभागवतोपूरयन्तीभगवतीसीतोच्यते राम
पदेनवात्सल्यस्वामित्वसौशील्यसौलभ्यसर्वज्ञत्वसर्वशक्तित्वाऽवाप्तसमस्तकामत्वसकलफलप्रद
त्वंनिरवधिकदयाकृपानुकंपाकरुणासौंदर्यमाधुर्याद्यनन्तगुणगणविशिष्टत्वंचप्रतिपाद्यते
उपायःशरणशब्देनोच्यते क निर्वचनात् ॥ रामोरमयतांवरइति महर्ष्युक्त निर्वचनात् श्रियासहितो
रामःश्रीरामः। श्रीशब्देनोक्तगुणविशिष्टा ॥ श्रीसीतापुरुषकारत्वेनच स्वीकृत्य रामपदेनसर्वशेषिणं
उक्तगुणविशिष्टंस्वाश्रितजनसंरक्षणवद्धदीक्षं। सर्वलोकशरण्यंश्रीरामंवरणीयत्वेननिश्चित्य

पायवाचकेन शरणशब्देन परमप्राप्यं तमेवोपायं करोतीति उपायान्तराशक्तस्य प्रमित्यादिरहितस्य ॥ म
मश्रीराम एवोपाय उपेयश्च यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति न्यायात् सर्वेश।
ब्दः ॥ सावधारणशब्दः तदुक्तं च मधुराचार्य्यैः श्रीराम एव शरणं समस्तानामुपास्य इति ॥ अत्र शरणशब्द
स्योपायवाचकत्वे प्रमाणमनुसंधेयं ॥ उपाये गृहरक्षित्रोः शब्दः शरणमित्ययं वर्त्तते सांप्रतं त्वेष उ
पायार्थैकवाचक इत्यादिकं ॥ अयमेव मंत्रो व्याख्रीयते महर्षिवाल्मीकिना लक्ष्मणमुखेन स भ्रा
तुश्चरणौ गाढं निपीड्य रघुनंदनः । सीतामुवाचातियशा राघवं च ॥ महाव्रतमिति अस्यार्थः स्मरा
मानुवृत्तिप्रयोजनोपायान्वेषी भ्रातुरित्यवर्ज्जनीयसम्बन्धकथच्छरणात्त्वमुक्तं चरणौ निपीड्येति
गाढत्वं चरणात्मविक्षेपकार्य्यराणान्यता निगाढमिति ॥ अस्यार्थतोक्त्या महाविश्वासउक्तः रघुनं
दनो रक्षमणः अतियशा आनुकूल्यसंकल्पप्रातिकूल्यवर्जनवान् सीतामुवाचेति प्रार्थनापूर्व
कमादौ सीतां पुरुषकारत्वेन परिगृह्य राघवमुवाच किमित्यपेक्षायां स्वप्राप्तेस्त्वमेवोपायो भव
ति महाव्रतमिति श्रीरामस्य महाव्रतत्वं भारते श्रीमद्रामायणे चोक्तं व्यत्येत्सूर्यो हिमवान्स्त्यजेत्स्थि

वीशकलीभवेत्॥ अनुष्येतोपनिधिः कृत्स्नेन मे मिथ्यावचानो भवेत्। द्विशरान्नाभिसंधत्ते द्विःस्थापयति
नाश्रितान्॥ द्विर्ददाति न चार्थिभ्यो रामो द्विर्नाभिभाषते मित्रभावे। ममेति भगवच्छेषत्वज्ञानानंदत्वा
द्युक्तलक्षणस्य जीवस्य ममोक्तगुणविशिष्टया सीतया सहितः वात्सल्यादिगुणविशिष्टः॥ श्रीराम एव
स्वप्राप्तेरुपाय उपेयश्च॥ न संप्राप्तं न त्यजेयं कथंचन। दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितं॥ अपि चेज्जी
वितं जह्यां त्वां वा सीते सलक्ष्मणां॥ न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः॥ तदास्यैतद्धुतं ममेत्युक्तं गुरु
तरव्रतमुक्तं॥ राघवपदेन कुलधर्मानुगतशरणागतरक्षणमुक्तं चकारात्। वक्ष्यमाणकैंकर्यप्रार्थनो
च्यते अहं त्वानुगमिष्यामि नावमन्येधनुर्द्धरः। कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते कृतार्थो हं भविष्या
मि न वचार्थः प्रकल्प्यते। धनुरादाय सगुणं खनित्रपिटकाधरः॥ अग्रतस्ते गमिष्यामि पंथानमनुदर्शी
यन्॥ आहरिष्यामि ते नित्यं मूलानि फलानि च। वन्यानि यानि चान्यानि स्वाहाराणि तपस्विनाम्॥ भ
वांस्तु सह वैदेह्या गिरिसानुषु रंस्यते। अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते इत्यादिभिः॥ वात्सल्या
दिगुणानां क्रमेण स्वरूपलक्षणप्रयोजनान्युच्यंते वात्सल्येति आश्रितदोषभोक्तृत्वं वात्सल्यमिति

केचन॥ आश्रितागस्तिरस्कारबुद्धिर्वात्सल्यमित्यपि॥ अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज। साधुभि
र्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः॥ नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना॥ श्रियं चात्यन्तिकीं ब्रह्मन्
येषां गतिरहं परा। ये दारागारपुत्राप्तान् प्राणान् वित्तमिमं परं। हित्वा मां शरणं याताः कथं तांस्त्यक
मुत्सहे॥ सुग्रीवं प्रति श्रीराम आह। त्वयि किंचित्समापन्ने किं कार्यं सीतया मया॥ भरतेनानुकूल्येन ल
क्ष्मणेन जवीयसेति स्वपराधानप्रयत्नभगवज्ज्ञानितभयनिवृत्तिरस्य॥ प्रयोजनं स्वामित्वं नाम स्वव्य
तिरिक्तसमस्तवस्तुनि स्वकीयत्वाभिमानः स्वत्वमात्मनि संजातं स्वामित्वं ब्रह्मणि स्थितं॥ मत्कार्य्य
मयसंशये कस्थितीति प्रत्ययाय स्वामित्वम्। सौशील्यं नाम॥ हीनैर्दीनैर्मलीनैश्च वीभत्सैः कुत्सितैर
पि महतो छिद्रसंश्लेषं सौशील्यं विदुरीश्वरे॥ विराधं नीचवीभत्सं निपद्धं न समागतो॥ ऋषिरक्षणाध
मंत्रौ यशद्धांगैराम लक्ष्मणौ। शोणितांतस्थितं सर्वांगं व्यादं च जटायुषं। अंकमारोप्य पप्रच्छ संचस्का
रमंतं नृपः॥ अहं च रघुवंशश्च लक्ष्मणश्च महावलः। दैवस्यादर्शनेनाघ धर्मतः परिरक्षिता यावनः सर्वलो
कानां त्वमेव रघुनंदन। मुहूर्तमपि रामं त्वां ये न पश्यंति शाद्रराः। पावित्ता सर्वलोकेषु कथ्यंते देवैरपि॥ श्रीरा

।।राम।।
।।१४।।

मत्राहएषसर्वस्वभूतोमेपरिग्रहोमयाकृतः।अस्यगुणानुसंधानस्यकिंफलंकथंरामोह्यसमस्पर्शेयोगपरस्या
मघवानितिकार्य्यगणंचस्वदैन्यस्यत्यस्यजनस्यतुआचार्य्यवदनात्सम्यक्सौशील्यश्रवणाद्दूरे।रित्यस्यप्रयोजनं
सौलभ्यंनाम।नमांसचक्षुरभिवीक्ष्यतेएननमित्युक्तरीत्यामांसचक्षुरविषयस्यापिदृष्टिविषयतामापद्यनित्यसन्निह
ततत्वं।अहंवोबान्धवोजातःसुहृदःसर्वदेहिनामित्यादिकमत्रमानम्।नारायणपरःसाक्षाद्वैकुंठनिलयःसदा
अर्चावतारतांप्राप्तोःभक्तानांहितकामया।।भगवद्दौर्लभ्यभयनिवृत्तिरस्यप्रयोजनम् सर्वज्ञत्वंनामयोवेत्तियु
गपत्सर्वंप्रत्यक्षेणसदास्वतः।।इतिसर्वज्ञतालक्षणंनाथमुनिनोक्तं।।अज्ञातंनास्तितेकिंचित्त्रिषुलोकेषु
राघवः।आत्मानंपूजयन्रामपृच्छस्यस्मान्सुहृत्तया।त्रिषुलोकेष्वितिसर्वलोकोपलक्षणंयःसर्वज्ञःससर्व
वित् परास्यशक्तिर्विविधैवश्रूयते अस्यसार्वज्ञानुसंधानस्यममार्तिंभगवान्जानाति।।नवाजानीयात्त
तस्तान्निवारयेत्इतिफलम्।शक्तिनाम।।कर्त्तुंविकर्त्तुंजगदन्यथाहिकर्त्तुंचसामर्थ्यविशेषरूपासक्तिः साप
स्यास्तीतिसर्वशक्तिः।तस्यभावः तस्यैवभगवतः शक्त्यैशरणापायैकृतोंजलिः।।यामाहायगुणाःसर्वेगर्जं
तिजितकाशिनः।।श्रीरामःस्वस्मिन्सर्वशक्तित्वंरामायणोक्तमरवैनेवाह।।नेवदेवानदैत्येयानपिशाचा

नराक्षसाः। भविष्यंतिममक्रोधात्तत्रैलोके विप्रणाशिते। यथाजरायथामृत्युर्यथाकालोयथाविधिः। नि
त्यंनप्रतिहन्यंतेसर्वभूतेषुलक्ष्मणः तथाहंक्रोधसंयुक्तोननिवार्योस्म्यसंशयः सदेवगंधर्वमनुष्यपन्न
गजगत्सशैलंपरिवर्त्तयाम्यहम॥ अंगुल्यग्रेणतान्हन्यामितितथाचश्रुतिः। यःसर्वज्ञःससर्ववित् परा
स्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेतिपुनःरामायणे॥ असाध्यःकुपितोरामोविक्रमे
णामहायशाः। आपगायाःसुपूर्णायावेगंपरिहरेच्छरैः। सताराग्रहनक्षत्रंनभश्चाप्यवशादयेत॥
असौरामस्तुसीदंतींश्रीमानभ्युद्धरेन्महीं। भित्त्वावेलांसमुद्रस्यलोकान्नाशाववयेद्विमान्॥ वेगंवापिसमुद्र
स्यवायुंवाविधमच्छरैः॥ संहृत्यवापुनर्लोकान्विक्रमेणमहायशाः॥ शक्तःसपुरुषव्याघ्रःस्रष्टुंपु
नरपिप्रजाः। तथाचाभियुक्तवचनम्॥ कर्तुमकर्तुंशक्तःसकलजगदेतदन्यथाकर्तुं॥ यस्त्वंविहायरामं
कामंमाधेहिमानसान्यस्मिन् नित्यंसंसारिणोनित्यसूरिप्रपत्तसंघटनेऽसामर्थ्यशंकानिरासः॥ शक्तेः
प्रयोजनम्। अवाप्तसमस्तकामत्वन्नामविभूतिद्वयशेषित्वात्सौत्तापतित्वाच्चावाप्तव्यसमस्तभोगप
परिपूर्णत्वं। तत्रप्रमाणंभगवतोक्तम्॥ नमेपार्थास्तिकर्तव्यंत्रिषुलोकेषुकिंचन॥ नानवाप्तमवाप्त

॥राम॥ व्यंवर्त्तएवचक्रमेरिता। महर्षिणापितद्देवर्षेश्चिंतनेनचास्यमहतींलक्ष्मींराज्यनाशोपकर्षति। लोककांतस्य।
॥२९॥ कांत्वाच्छ्रीतरशेमरिवक्षयः॥ नवनंगंतुकामस्यत्यजतश्चवसुंधराम्॥ सर्वलोकातिगस्येवलक्ष्यतेचित्तवि
क्रियासर्वोल्पभिजनःश्रीमानश्रीमतःसत्यवादिनः। नालक्ष्यतरामस्यकंचिदाकारमानने॥ उचितंच
महाबाहुर्नजहौहर्षमात्मवान्॥ शारदःसमुदीर्णांशुश्चन्द्रस्तेजइवात्मजम्॥ इत्यादिभिःहर्षशोकभय
निमित्तेष्वपिभगवतिश्रीरामेसततमविक्रियत्वलाभोऽस्यगुणानुसंधानफलम्॥ दयानामप्रतिकूला
नुकूलोदासीनसर्वचेतनाचेतनवस्तुविषयस्वरूपसत्तोपलंभनरूपपालनानुगुणव्यापारविशेषोहि
भगवतोदया। यद्वास्वार्थमनपेक्ष्यपरदुःखदुःखित्वमितिकेचित्॥ परदुःखनिराचिकीर्षेति॥ तथा
चश्रुतिः॥ एषभूतपतिरेषभूतपालएषसेतुर्विधरणएषांलोकानामसंभेदाय अमृतस्यैषसेतुरित्या
दि॥ व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः॥ उत्सवेषुचसर्वेषुपितेवपरितुष्यतिदृष्टएवहिनःशोक
मपनेष्यतिराघवः॥ नमःसर्वस्यलोकस्यसमुद्यन्निवभास्करः॥ अपृक्तरीत्याभगवतश्चेतनाचेतनस्व
रूपस्थितिप्रवृत्तिसंरक्षणादशायां॥ दयायाःप्रधानंपालनंदेदुःधात्वर्थोनिर्निमित्तंहरेर्गुणाःद

पारम्य । श्रुतिविख्यातो नित्योऽशेषस्वरूपतः । त्यक्तस्वरक्षोपायस्य सर्वात्मना तत्सेवनादिप्रवृत्तस्य मम
स्वरूपसत्तानिर्वाहकस्त्राणतत्परो भगवानेवेत्यध्यवसायवत्त । स्वस्मिन्नित्निर्भयत्वलाभोऽस्य गुणानुसंधा
नफलम् । कृपानामरक्षणे सर्वभूतानां महेश्वपरो विभुः । इति सामर्थ्यसंधानं कृपा सा परमेश्वरी । । स्वसा
मर्थ्यानुसंधानाधीनाकालुष्यनाशनः हार्दो भावविशेषो यः कृपा सा जगदीश्वरी । कृपासामर्थ्ये इति स
पन्नत्वात्कृपाशब्दस्यायमर्थो निश्चयन्तः तत्र प्रमाणं भारते यावै साधनसंपत्तिः पुरुषार्थचतुष्टये । तया ।
विना तदाप्नोति नरो नारायणाश्रयः । किं दुरापादनं तेषां पुंसामुद्दामचेतसाम् । । यैराश्रितस्तीर्थपद
श्चरणो व्यसनात्ययः । यस्य कृपा भवेत्पुंसो रामस्यामिततेजसः । तस्यैवाचार्यसङ्गः स्यात्साधनसा
धनमेदृश्यत सतं निपतितं भूमौ शरण्यः शरणागतं । । वधार्हमपि काकुत्स्थः कृपया पर्यपालयदिति
अनेन गुणानुकाललाभ इति चेत् । । परमरक्षितरि कृपालौ सन्निहिते आश्रितस्यानिष्टनिवृत्तौ इष्टप्रापणा
यास्त्विंताऽऽयासनिवृत्तिलक्षणो लाभ इत्यस्यानुसंधानफलम् । । अनुकंपानामरक्षिता आश्रितभक्ता
नामनुरागसुखेच्छया । । भूयोभीष्टप्रदानाय पश्चात्ताननुधावति । । अनुकंपागुणास्येष प्रपन्न,

॥राम॥ प्रियगोचरः॥ तथाह श्रीवासुदेवः॥ तेषामेवानुकंपार्थमहमज्ञानजं तमः॥ नाशयाम्यात्मभावस्थो ज्ञान
॥१६॥ दीपेन भास्वता॥ निर्वैरं मुनिशांतं सर्वत्र समदर्शनम्॥ अनुव्रजाम्यहं नित्यपूजयेत्यंघ्रिरेणुभिः॥ तथा
श्रीरामजगर्तव्यमतंस्त्रिश्यामघप्रभृतिरात्रिषुयोगक्षेमोहिसीतायावर्त्ततेलक्ष्मणाययो॥ यत्फलं वा
प्रार्थयते पृथ्वं वा जनकात्मजा॥ तत्तत्र दद्यां वैदेह्यै यत्रास्या रमते मनः॥ अहं सीतां च राज्यं च प्राणान्नि
ष्टान् धनानि च वत्स्ये मात्रे स्वयं दद्यां भरताय प्रचोदितः न नु कश्चिल्लोके कंचिच्छक्नुइक्षाति सकृद्दा
ति सकृदुपकरोति न भूयो भूयस्ततिलोकरीतिः॥ भगवत्यारोप्य भगवद्वता अपरां स्यादिति चेतन्निवृत्तिरेत
दुगणानुसंधानफलम्॥ किंच मामङ्गीकृत्यापि सर्वेश्वरत्वान्त्यजेद्वा विस्मरेद्वेति संशयस्यापि निवृत्तिः फ
लम्॥ लोकविलक्षणा भगवतो रीतिरित्यत्र प्रमाणं द्विः शरं नाभिसंधत्ते द्विः स्थापयति नाश्रितान् द्विर्द
दाति न चार्थिभ्यो रामो द्विर्नाभिभाषते॥ सकृदेव प्रपन्नाय मयात्वंसमम ज्ञाततो गच्छ लोकाननुत्तमान्
दद्यान्न प्रतिगृह्णीयात्सत्यं ब्रूयाच्च नानृतं॥ रात द्वाह्मणा रामस्य व्रतं ध्रुव मनुत्तमम्॥ अपि चेज्जीवितं ज ॥राम॥
ह्यां त्वां वा सीते सलक्ष्मणाम्॥ ननु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः॥ यदि वा नादिदोषेणामभ्यः॥ को ॥१६॥

मां न संस्मरेत् अहं स्मरामि मद्भक्तं नयामि परमां गतिम्॥ यत्तेजो हि मवान् स्रजेत् पृथिवी सकली भवेत्। शुष्ये
त्तोयनिधिर्नित्यं न मे मिथ्या वचो भवेत्॥ अन्यथा भगवतोऽच्युतेति वेदविहिता संज्ञा च न स्यात्। न च्युता अभ
यप्रदानरूपा सत्या प्रतिज्ञा यस्य सोऽच्युतः यद्वा न च्यवते प्रतिज्ञाया असावच्युतः। करुणा नाम आश्रितार्त्ति
निनाहेम्नो रक्षितुर्हृदयद्रवः॥ अत्यन्तमृदुचित्तत्वमश्रुपातादिकृद्भवेत्। कथं कुर्यां कदा कुर्यामाश्रि
तार्त्तिनिवारणम्॥ इतीच्छा दुःखदुःखित्वमार्त्तानां रक्षणे त्वरा। परदुःखानुसंधानाद्विकलीभवनं वि
भोः। कारुण्यात्मगुणो ह्येष आर्त्तानां भीतवारकः॥ मन्त्रः सर्वरक्षकात्सर्वकारणात्कथं भीतिरुत्प
द्यते। इति चेदुच्यते भीषास्माद्वातः॥ पवते भीषोदेति सूर्यः॥ उग्रवीरमित्यादि मृत्युमृत्युमित्यन्तं। अत्रोक्त
करुणा कृत्या करुणारता उग्रवीरं महाविष्णुं ज्वलन्तं सर्वतोमुखं॥ नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् नाभीत्यु
त्पत्तौ किं बाधकमस्ति। अतएव परमकारुणिकस्य तस्याश्रयणं। सर्वात्मना मुमुक्षूणामुपादेयतया मतः
आर्त्तानां तु विशेषेण चिंतामणिश्च याधिकः॥ अयं गुणो न चेद्विष्णुर्ईशानाः सत्तामपि। निरनिष्टोऽप्यदुःखो
समर्थोऽपि परप्रमान्। नावतिष्ठति दुःखी वा यावद्दुःखं न नाशयेत् सुखीकृत्य परान्भक्तान्स्वयं पश्चात्सुखी

भवेत्॥ रामस्यैवं स्वभावो यं दृष्टो रामायणे स्फुटः। क्रूरः क्रूरतरेभ्यस्तु स्माद्यक्रूरतमोऽप्ययम्॥ त्वं चलेवं धना
दासु पादयोः पतनादनु॥ प्रेमार्द्रितहृदयो राम आत्मदानात्प्रसीदति। दुःखादागामिनः पूर्वं सतां दुःखी त्यहो
परः॥ अतो लंकरुणाख्यानस्त्रिषु लोकेषु राघवः॥ ननु निखिलहेयप्रत्यनीकत्वस्वभावस्य भगवतश्चन्द्रकल
ङ्कवत्परदुःखदुःखित्वरूपमवद्यं न सहामहे। निर्विकारश्रुतिविरोधादिति चेन्न व्यसनेषु मनुष्याणां भृशं
भवति दुःखितः॥ अभ्युदयेषु च सर्वेषु पितेव परितुष्यति॥ इतिप्रमाणाद्रामस्वभावात्। चन्द्रेऽन्तवत्पुष्येसौरभव
दरविंदे मलिनत्वन्मौक्तिके छिद्रवच्च परमकारुणिके भगवति श्रीरामे कारुणापरमार्हभावरूपपरदुःख
दुःखत्वादिकं स्यादुत्तमत्वभावहृतित्तस्माभ्द्रजनप्रपदनाभ्यामनाद्यनेकापराधजनितं कालुष्यं त्यजतीति
मन्तव्यमतदुक्तमाचार्यपादैः। सोऽयोपायोऽन्तरङ्गे रागसिद्धोयापस्यथे षिदा लीलाप्रवाहः कारुण्यप्रवाहेणा
निरुध्यते॥ तेनैव सर्वे सायुज्यमिकत्वासेवं धुवत्। स्वतन्त्रस्यापि संकल्पाः स्वैकेकर्यानिरोधकाः॥ उत्पुक्त सघ
टनज्ञानाज्जापमानस्य भगवच्छ्रासवत्तयोरवस्परस्परस्सकत्वज्ञानस्यल्हृदयारुदवज्रेषासरवनास्ति क
नासो भगवति नैष्ठुर्य्ये निश्चयनाशश्च प्रयोजनम्॥ सौंदर्य्ये नामयथाहं मन्विविष्टानामंगानां रुचिरत्वि

णां॥ शोभोत्कर्षैकसंदर्भः सौंदर्यं परमं मतम्॥ अन्योन्यापेक्षया तेषामुत्कर्षोत्कर्षदर्शनम्॥ आश्चर्यंभव
दङ्गानां सौंदर्यं सुदृशां मतम्॥ अङ्गेन येन येनैव दृष्टमात्रेण पश्यतां। सुखमुत्पद्यते सद्यः सौंदर्यं मु दृ
शां मतम्॥ अङ्गेन येन येनैव दृष्टमात्रेण पश्यतां। सुखमुत्पद्यते सद्यः सौंदर्यं तत्र तत्र च॥ अन्यस्य दर्श
नेऽन्यस्य दिदृक्षा तु न जायते॥ अंगानां तादृशां पुंसां सौंदर्यं संहतिः परम्॥ अनूनानधिकत्वं च सल्लक्षणा
त्वान्न वर्ण्यते। सौंदर्यं परमं स्वेन तत्पश्यतां तु सुखद्रुमः। रामं पतिव्रता दृष्ट्वा सेयं नैयं च लक्षणी॥ अनहीन्य
स्य संस्पर्शे देवी सीतेव निर्मला॥ तत्र प्रमाणं हनुमानाह रामः कलत्रपद्यास्यः सर्वसत्त्वमनोहरः रूपयौवन
संपन्नः प्रसूतो जनकात्मजे॥ विपुलांसो महाबाहुः कंबुग्रीवः शुभाननः। गूढजत्रुः सुताम्राक्षो रामो ना
म जनैः श्रुतः॥ चंद्रकांताननं राममतीव प्रियदर्शनम्॥ रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम् इत्यादि
कम्। रागानुसंधानस्य भगवतो दिव्यमंगलविग्रहे समनस्क नस्तु षां स्थिरप्रतिष्ठालाभः फलं माधु
र्यं नाम॥ स्वाद्वैकावधिहेतुत्वं पित्तोपशमोत्तरम्॥ रसशब्दस्य सार्थकं माधुर्यं रसिकेप्सितम्। वहुत्र च
प्रस्तुतत्वाच्छब्दो मधुर इत्यपम्। ततस्तेभ्यो विवक्षयोर सस्थैर्यं विवक्षुणा सितासितोपलादिभ्यो दुग्धया

कादित्तोपि सः। सहस्रगुणितोरामोमधुरःप्रथितःसताम्॥ क्षीरोदमथनोद्भूतादमृतात्कुलगौरवात्। श्री
रामोमधुरोत्तोऽमृतस्यापासनिरासकः कालहालाहलज्वालाधाराजलदाली रामाकारासुधाकाराविबु।
धांस्तुधिसंगतापित्वादेवामृतकोऽपिमुक्तः संसारदाहतः॥ इति श्रीत्रगतेनैवत्तमराममनुजादिनः स्वरूप
वेषात्मगुणकथात्मबोधवैः। सहैवमधुरोरामः संसारामयनाशनः। तत्रप्रमाणाम्। श्रीरामनामामृतमं
त्रबीजंसंजीवनीचेन्मनसिप्रतिष्ठा। हालाहलंवाप्रलयानलंवामृत्योर्मुखंवाविशतांकुतोभीत्यादिकम्।
फल्गुवैराश्यज्ञानादिनिवर्तनद्वाराभगवत्पादार्चनादिषुस्थिरपरमरुच्युत्पादकोयंगुणः सौहार्दं
नामद्विजत्वादनपेक्षेणायेनासायौहरिः पुरागुणोनसगुणास्तस्य सौहार्दपरमंहरेः॥१॥ स्वप्रीतेः स्वप्रय
तेश्चकारुण्यांकारुण्यावुधेः॥ हित्वन्तरापेक्षांहिसौहार्दसाम्यतंहरेः॥२॥ तत्रप्रमाणांप्रल्हादवाक्यं ना
लंद्विजत्वंदेवत्वमृषित्वंवासुरात्मजाः॥ प्रीणनायमुकुन्दस्यनवृत्तंनबहुज्ञता। नदानंनतपोनज्ञानशौ
चंनव्रतानिचप्रीयतेमलयाभक्त्याहरिरन्यद्विडंबनम्॥ मन्येजनाभिजनरूपतपश्श्रुतोजः॥ जः प्रभावब
लपौरुषबुद्धियोगाः। नाराधनायहिभवन्तिपरस्यपुंसोभक्त्यातुतोषभगवानगजयूथपाय। हनुमद्वा

कंच॥ सुरोऽसुरो वाप्यथवा नरो नरः सर्वात्मना यः सुकृतज्ञमीश्वरं॥ भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोशलान् दिवम्॥ नजन्म नूनं महतो न सौभगं न वाङ् न बुद्धिर्नाकृतिस्तोषहेतुः। तैर्यद्विसृष्टानपि नो वनौकशश्चकार सख्ये बत लक्ष्मणाग्रजः॥ भगवानाह सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छतीति। अनेन गुणारत्नेन सिद्धोपायत्वमीशितुः। अभिमुख्याधिकारश्च प्राणिमात्रस्य सूच्यते इत्यस्य फलम्। क्षमानामस्त्वस्यगन्तुं जन्तूनामागः कृत्स्नादि संसहात्र॥ अत्युग्रनिग्रहो दर्वा संकल्पोपरतिः क्षमा। क्रोधकालाग्निजिह्वानां क्षमां कादम्बिनीं लये॥ कालाग्निसदृशः कोपे क्षमया पृथिवीसमः इत्युक्तेः॥ प्रयत्नापूर्णायाचात्मदीनानां शरणेपि परां सामर्थ्यं विशदीकुर्वन्। रमाकान्तः प्रसीदति। तदुक्तं दुराचारोपि सर्वाशी कृतघ्नः पापस्कृतपुरासमाश्रयेद्यदि देवशरणं शरण्यं यदि निर्दोषं विद्धि तं जन्तुं प्रभावात्परमात्मनः इति अतिक्रान्तान्यकामानां हरेः सेवाभिलाषिणां॥ प्रसादस्त्वागसां क्षान्तिरूपो मोक्षसुखावधिः। असंख्येयानामागसां। भगवतः क्षमां विना कल्पकोटिसहस्रायापि येऽस्यनाशं ज्ञात्वा भगवतः क्षमाप्रार्थनप्रवृत्तिरिति क्षमाज्ञानस्य प्रयोजनम्। सर्वफलप्रदत्वं नाम हेयप्रत्यनीककल्याणै

कत्तानस्य परमकारणभूतस्य सर्वज्ञस्य सर्वशक्तेः। परमकारुणीकस्य भगवतः श्रीरामस्यैव विष्णो। श्रुतिस्मृ
तिसूत्रेषु सर्वफलप्रदत्वं निर्णीतं। तथाहि फलमत उपपत्तेः॥ अस्यार्थः॥ अतः परस्मात्पुंसरोहिकामुष्मिक
मपवर्गाख्यफलं भवतिकुतः उपपत्तेः। सएवंहि सर्वज्ञ सर्वशक्ति र्महोदारो यागदानहोमादिभिरुपासने
नचाराधितरोहिकामुष्मिक भोगजातं स्वस्वरूपावाप्तिरूपमपवर्गं चदातुमिष्टे। अतत्वाच्च। सवाएषमहा
नज आत्मा ऽन्नादो वसुदानः॥ एषएवानन्दयति इति भोगापवर्गरूपं फलमयमेवददातीतिश्रूयते॥
स्मर्य्यते च॥ योयो यां यां तनुंभक्तः श्रद्धयार्चितुमिच्छति। तस्यतस्याचलांश्रद्धांतामेव विदधाम्यहं सतया श्र
द्धयायुक्तस्तस्याराधनमीहते॥ लभतेचततःकामान्मयैव विहितान्हितान्निति। अहं हि सर्वयज्ञानां भोक्ता
च प्रभुरेवचेति प्रभुरितिफलप्रदायीत्यर्थः। स्कांदे॥ बंधको भवपासेन भवभ्यासाच्चमोचकः। कैवल्यदः
परंब्रह्म विष्णुरेव सनातन इतिरूपमिति। चुम्बकायः कणान्यायैदूराद्राकर्षको बलात्॥ चक्षुषासगुणो
रूपं शाणाः शमारशराबलेः दीपार्चिः। पतंगाश्रित्यापूर्णांयोमोहनोगुणः स्वरूपं गमपत्येतद्रमम्यागम
नेनरम। रूपंसौंदर्य्य माधुर्य्य यौवनान्यनघानिज। व्यावेयेयुः स्वनिष्ठायायोगीन्द्रानपि किन्नरान। रूपं

भाग्याधिक्यैर्लभ्यंपुन्यामरतरोःफलम्।देवानांदेवतानांचरूपंभोग्यतमंहिविचक्षुसाफल्यसाधुत्वंरूपत्वं
रूप्यतेवुधैः॥पुंसांस्त्रीरामभिन्नानांपुन्याधिक्यफलंत्विदम्।तस्यस्वाभाविकंरूपंनित्ययौवनशालिन
म्॥द्विनेत्रोद्विभुजानन्द्योहरिरामाशिक्यवरोभा॥यामूर्त्तीरामचंद्रस्यरूपंतत्रप्रतिष्ठितम्।कोटिशोमू
र्त्तियस्तेनुसाम्भूताम्भुत्तभावकाः हरेस्ताभ्योप्युपादेयामूर्त्तिरेषैवभावदा।त्रैलोक्यमोहनेरूपंरामम्
र्त्तैवसंहितम्॥आशिखंनखपर्य्यंतंपूर्णब्रह्मैववस्त्वरम्॥जितानङ्गाजितक्रोधाजितेंद्रियगणेश्वरा॥
संसाराद्भीरवोमुख्यासाध्यभक्तिपरायणाः॥येतेप्येवंविलोक्यैवरामंरूपधनाधिपंत्यक्तसाधुतप
श्चर्य्यांभोक्तुमैच्छन्सुविग्रहमिति॥तदुक्तं॥पुरामहर्षयस्सर्वेदंडकारण्यवासिनः।दृष्ट्वारामंह
रिंतत्रभोक्तुमैच्छन्सुविग्रहमिति॥व्यंजितचैतदारण्यकांडे॥रामरूपनिमग्नानिपश्यपश्चक्षुमनो
सिच॥नापकर्ष्टुहितेशेकुःपश्यतोराममच्युतं॥तदुक्तंनहिकश्चिन्मनस्तस्माच्चक्षुषोवानरोत्तमात्॥
नरःशक्नोत्यपाकर्ष्टुमतिक्रान्तेपिराघवे।यश्चरामंनपश्येत्तुयंचरामोनपश्यति॥निंदितःसर्वलोके

षु स्वात्मानयथैनंविगर्हेतइति। अहमस्यावरोभ्राताल्लक्ष्मणोनामनामतः॥ बहुज्ञस्यकृतज्ञस्यगु
णैर्दास्यमुपागतः॥ आत्मारामाश्चमुनयोनिर्ग्रन्थाअप्युरुक्रमे। कुर्वन्त्यहैतुकींभक्तिमित्थंभूतगुणोहरि
रित्युक्तनीत्याप्रासंगिकानसंगिक। यादृच्छिकसुकृतविशेषोदयेनोदासीनोपायान्तरार्थान्तरनिमग्नज
नानांपरिश्रोत्रगतोल्हृतश्चैवदेषभगवदभिगमनादौत्वरयाप्रवर्तकोयंगुरुः। तृतीयरहस्यमप्याह॥
सकृदेवप्रपन्नायतवास्मीतिचयाचते॥ अभयंसर्वभूतेभ्योददाम्येतद्व्रतंमम। सकृदेवएकवारमेवानावृ
त्तिलक्षणांप्रपन्नायेतिमानसीं। तवास्मीतिचयाचतइतिवाचकींचप्रपत्तिंकृतवतेधिकारिणे॥ अनालो
चितविशेषाशेषसर्वलोकशरण्यः। रघुकुलोद्भवरामोहंसर्वभूतेभ्योऽभयं॥ ददामिदद्यामित्यर्थःसर्वभू
तेभ्यः॥ पंचमीचतुर्थीचपंचमीपक्षेऽभयमितिसंकोचेमानाभावात्॥ भयहेतुभ्यःसर्वेभ्योभूतेभ्यःस्वस्माद
पि॥ अनेनसर्वस्यवशीसर्वस्येशानइत्यादिगुणजातंसूचितम्॥ चतुर्थीपक्षेचसर्वेभ्योऽभयंनकेवलं
विभीषणाय॥ अनेनप्रपत्तिविषयेसर्वेषांदेवमनुष्यादीनांजीवानामधिकारःसूचितः। अभयं

द्वाभ्यांतद्भूतंममेत्यनेनकस्यांचिदपिदशायांपरित्यागायोग्यमित्यर्थः। अभयमेवमोक्षोनामअथसो
भयंगतोभवति॥ आनंदंब्रह्मणोविद्वाननबिभेतिकुतश्चनेतिब्रह्मविद्याफलत्वेनश्रवणात्॥ इतिश्रीम
दनस्वामिविरचितंरहस्यत्रयवाक्यार्थसंपूर्णम्॥ श्रीसम्वत॥१९५४। फाल्गुणशुक्लद्वादश्याम्॥



।रहस्यत्रय वाक्यार्थ।

पं. ~~६८~~ ५०

ग्रं० सं० ~~६५०~~ २४३

